शोधनपूर्वकं वाक्यार्थो दर्शितः नत्वापूर्वमित्यादिना कार्यकारणत्वादिधर्मरहितत्वेन तत्पदार्थ उपलक्षितः सर्वा
नुभूतिरिति सर्वसाक्षितया त्वंपदार्थः अयमात्मा ब्रह्मेति वाक्यार्थस्तु ति विभागः मनःप्राणादिषु प्रकाशकत्वेन प्रे
रकत्वेन चोपलक्षितमात्मतत्त्वं ब्रह्म विदिताविदिताभ्यां कार्यकारणाभ्यामन्यदिति तत्स्वरूपं विधानेऽन्यदेव तद्विदि
ताद्धोऽस्य नेनेत्यर्थः ॥ आविदाकाशशब्देनापि ब्रह्मलक्ष्यत इत्याह आकाशो वै नामेति नामरूपयोर्जगद्बीजभूत
योरव्याकृतयोर्निर्वहिता स्वाकर्त्री नेनामरूपे यदन्तरा यस्य मध्ये वर्त्तते न ततः पृथक् स्वतन्त्रेण ब्रह्मत्वदमृतं स आ
त्मेति वाक्यशेषात् दहरोऽस्मिन्नन्तराकाश इत्यत्राकाशशब्देनापि ब्रह्मलक्ष्यत इत्यर्थः आदिपदात् प्राणोऽस्मि प्रज्ञा
त्मा प्राण इति हो वाचेत्यादयः श्रुतयो ग्राह्याः तेन न केवलं श्रुतिभिरेव ब्रह्मोपलक्षणं ग्राह्यं येदपि तु स्मृतिभिश्चेति
श्रुत्युक्तलक्षणाविरुद्धाभिरिति स्मृतिविशेषणं श्रुत्येकार्थत्वस्फुटोदाहरणं प्रतिपत्तिदार्ढ्यार्थं न श्रुतिप्रामाण्यसि
द्ध्यर्थं विशेषणं च सांख्यादिस्मृतिप्रसंगवारणार्थमिति च द्रष्टव्यं परमात्मा संसारित्वप्रतिपादनपराभिरित्या
दि विशेषणद्वयं श्रुतिस्मृत्योः साधारणं परमश्चासावात्मा च परमात्मा परमत्वं चास्याविद्यातत्कार्यसंघातत्वद
स्थासाक्षितया व्यभिचार्यलुप्तप्रकाशस्वभावत्वं तस्यासंसारित्वप्रतिपादनं संघाताद्व्यस्याद्व्योपाधेः
सम्यग्विवेचनं तत्पराभिरित्यर्थः तत्र शोधितस्य त्वंपदार्थस्य परेण [illegible] सर्वं सर्वाधिष्ठानं ब्रह्म

सर्व

उ·स्मा· तेनानन्यत्वं तदेकात्मत्वं तत्प्रतिपादनापराभिरित्यर्थः [illegible]न्यायानुगृहीताभिश्चेत्यस्मिन्नर्थे चकारः
१ ७

आकाशो वै नामेत्यादिश्रुतिभिश्च स्मृतिभिश्च न जायते म्रियते नास्ते कस्यचित्पापं
यथाकाशस्थितो नित्यं सर्वत्रावस्थितो विद्धि न सत्तन्नासदुच्यते अनादित्वान्निर्गुण
त्वात् समं सर्वेषु भूतेषु उत्तमः पुरुषस्त्वित्यादिभिः श्रुस्मृतिलक्षणाविरुद्धाभिः पर
मात्मासंसारित्वप्रतिपादनपराभिस्तस्य सर्वेषामनन्यत्वप्रतिपादनपराभिश्च ७

१

एवं वाक्योपदेशेनानर्थोपलक्षणपरश्रुतिस्मृतिव्याख्यानेन च प्रतिबोधितं शिष्यमज्ञानसंशयविप
र्यासापोहेनोपदि[illegible] ॥

क्षायामाद्युपदिश्यत्वयाद्यत् ब्रह्मणो लक्षणमिति पिपासे शोकं मोहं जरां मृत्युमत्येतीति शेषः आनंदमनंतमित्य
भयत्र ब्रह्मेति वाक्यशेषः एवं सर्वेष्वन्यवाक्येषु शेषाक्षराणि श्रुतिपरिचयेन पूरणीयानि ग्रंथभूयस्त्वभयान्न सर्वत्र प्रदर्श्यं
ते। य आत्मापहतपाप्मेत्यादि प्रजापतिवाक्येन जाग्रदाद्यवस्थासु द्रष्टृत्वेनानुगतः अवस्थाधर्मैः रहितो ऽशरीरः प्रिया
प्रियाभ्यामसंस्पृष्टः प्रत्यगात्मैक्यपरं ज्योतिः परं ब्रह्म उपास्यं ज्ञेयं चेति प्रकरणार्थोऽपन्यासेन प्रत्यक्षब्रह्मेत्यप्रपरक्ष
योरित्यर्थः य आत्मा सर्वांतरो द्रष्टृबुद्धिवृत्तिलक्षणाया दृष्टा प्राणनादिव्यापारोपलक्षितः स एवाशनादिप्राणांतः
करणशरीरधर्मातीतः साक्षादपरोक्षात् ब्रह्मेति द्वितीयवाक्यार्थः नेति नेतीत्यादिवाक्यानां सकलदृश्यप्रवि
लापनेनाद्वितीयात्मतत्त्वोपलक्षणपरत्वं अदृष्टं द्रष्टृ इत्यादिना नान्यदतोऽस्ति द्रष्टेत्यादिवाक्यैः सकलसर्वसाक्षि
प्रत्यगात्मैवाक्षरं यस्मिन्नव्याकृताकाशादिधारकं तज्जगदोतं च प्रोतं चेत्युपलक्षितं तत्त्वमित्यर्थः विज्ञानमा
नंदं ब्रह्मेति को न्वेनं जनयेत्पुनः मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहतीति एतस्य जगन्मूलकारणत्वे
नोपलक्षितस्य स्वरूपं विज्ञानानंदलक्षणमिति भयदार्घेनत्वमुपलक्षितमित्यर्थः एवं ब्रह्मविदाप्नोति परमि
ति प्रकृतस्य ब्रह्मणः सत्यं ज्ञानमनंतं ब्रह्मेति स्वरूपं निर्दिश्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिना ज

गत्कारणत्वेनोपलक्षितस्यानेस्यैवसृष्टेषुकार्यकारणसंघातेषुप्रवेशंदर्शयित्वाऽदृश्येनात्म्येनिरुक्तइत्यादि
नापुपंचापवादेनसर्वाधारंसर्वसाक्षिणमात्मानमानंदरूपंबुसपुच्छंप्रतिष्ठेति अथसोभयंगतोभवति स
मभ्यायंपुरुषेयभ्यासावादित्येसएकइतिचतत्त्वमुपलक्षयेदित्यर्थः सवाएषमहानजआत्मायोयंविज्ञा
नमयः प्राणेषुयएषोंतर्हृदयआकाशस्तस्मिंछेतेसर्वस्यवशीत्यादिना जाग्रदाद्यवस्थाधर्मैरनन्वागत
स्यासंगस्यकामोभ्यांसंसारमोक्षावनुभवतोबुध्यादिसाक्षिणश्चिदात्मनोंतर्हृदयेआकाशशब्दवाच्याजराम
रांभयादिलक्षणब्रह्माभेदइतितत्त्वमुपलक्षितमित्यर्थः दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः अ
प्राणोह्यमनाःशुभ्रोक्षरात्परतःपरइति अथपरायया तदक्षरमधिगम्यतेयत्तदद्रेश्यसर्वज्ञस्यसर्ववि
दोग्निविस्फुलिंगादिवत् जीवरूपेणविभक्तस्तोल्पात्मपरिच्छेदशंकानिराकरणेनप्रत्यक्तत्त्वमुपलक्षि ७
तं ब्रह्मैवेदंविश्वमिदंवरिष्ठमित्यनेनेत्यर्थः इदंसर्वंयदयमात्मेति सर्वस्यदृश्यस्यात्मव्यतिरेकेणस्वरूपा ८
भावमुक्त्वा दुंदुभ्यादिदृष्टांतेरुपपाद्यकिंतदात्मनःस्वरूपमित्यपेक्षायांमहद्भूतमनंतमपारंविज्ञानघनएवेति
तत्त्वमुपदिष्टमित्यर्थः तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्माब्रह्मसर्वानुभूरितितत्त्वंपरार्थपति

3 रणादिर्गृह्यते अक्रोधादिभिरित्यत्रादिपदेनाकामादयो गृह्यन्ते अहिंसादिभिरित्यत्रादिपदात्सत्यास्ते
यब्रह्मचर्यापरिग्रहा गृह्यन्ते अत्राक्रोधादीनामहिंसादीनामुपायोपेयभावेनोपदेशो बोद्धव्यः शौच
संतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा उच्यन्ते तेषां ज्ञानाविरुद्धत्वमिति विशेषणेन तीर्थयात्रा
चान्द्रायणोपवासादिकर्मकाण्डपरायणबाह्यसाधनक्रियाप्रधानेश्वरपूजानिष्ठादि च यत् ज्ञानानि
ष्ठाविक्षेपकं तस्यानादरणीयतां दर्शयति यमनियमोपदेशस्तु सर्वदोषनिरासस्साधारणोपाय
इति द्रष्टव्यं एवं ज्ञानग्रहणप्रतिबन्धकनिवर्तकमुपदिश्य ज्ञानोदयहेतुज्ञानमुपदिशति अमानित्वा
दिगुणमिति आदिपदाद्दम्भित्वादि तत्त्वज्ञानार्थदर्शनान्तं गृह्यते यद्वा मानित्वेनादम्भित्वादिकं सरूपपठितत्वे म
नोपलक्ष्यादिपदेनाद्वेष्टा सर्वभूतानामित्यादिनोक्ता अद्वेष्टृत्वादयो धर्मा ग्राह्याः अत्र सम्यक् पदमेतन्निष्ठं सर्व
दोषपरिहारेण यत्नलभ्यं ज्ञानदार्ढ्यमिति दर्शयितुं अयं भावः नहि हंससङ्ग्रहणमात्राद्धृढाहर्द्धोऽसकृद्धि आवृत्ति
रसकृदुपदेशादिति न्यायात् श्रवणोत्तरकालं मननादिविधानसामर्थ्याच्चाहरहस्तं हि फलपर्यन्तत्वं विधायाविवक्षि
तमतः फलानुकूलतया ... सिद्धिविनियोज्य ... प्रवृत्तेनविरोधपदयोगार्थं वा प्र
वृत्तेनोपदेशः कार्य एवेति ४

ऋ

एवमाचार्यकृत्यमुक्त्वा तस्य लक्षणमाह आचार्यस्त्विति एतच्च तत्त्वजिज्ञासुनाधिकारिणा एवंविध आचार्य
उपसत्तव्यो नान्यादृश इति र्द[illegible]यति दर्शयितुं तथा आचार्येणैवंविधगुणेन भवितव्यमिति नियोगः क्रियते तस्य
सतार्थत्वादिति ऊहश्च शिष्येणानुक्तस्याप्यूहनमूहः उपदेशासमसमर्थयोः शिष्यवृत्तिपरस्यानुकूलः प्रवृत्ति
कृत्यं तथा शिष्यस्य मिथ्याग्रहणापाकरणसामर्थ्यमपोहः सिद्धान्तप्रतिपक्षनिराकरणसामर्थ्यं वा शिष्यकृ
तप्रश्नाक्षेपवाक्यार्थानां सद्यो धारणासामर्थ्यं ग्रहणं गृहीतानां नानेकसारासारावधारणपूर्वकं वस्तुक्लिसम

धारण

आचार्यस्तूहापोहग्रहणशमदमदयानुग्रहादिसंपन्नो लब्धागमो दृष्टादृष्टभोगेष्वनासक्तः
त्यक्तसर्वकर्मसाधनो ब्रह्मविद्ब्रह्मणि स्थितोऽभिन्नवृत्तो दम्भदर्पकुहकशाठ्यमायामात्सर्यानृ
ताहंकारममत्वादिदोषविवर्जितः केवलपरानुग्रहप्रयोजनो विद्योपयोगार्थी पूर्वमुपदिशेत् ५

दुःखिनं प्रस
येऽस्मरणयोग्यतापादनं धारणं शमदमौ व्याख्यातौ दयानुजिघृक्षा तदनंतरं दुःखिनो दुःखापाकरणे प्रवृत्तिर ६
नुग्रहः आदिशब्दादुपसन्नस्य विनीतस्यानुगृहीतस्यापरित्यागो गृह्यते यस्तु हिंसानुग्रहयोरनारम्भी तेनो
नमेन संन्यासिद्धो दर्शितो यच्च न व्याख्यानपरो मतिरित्यादिवचनं तत्र ख्यातिलाभपूजालाभाद्यर्थमादिहेतु
प्रवृत्तिविषयमित्यदोषः संपन्न इति पूर्वोक्तगुणैराढ्यतोच्यते लब्धागमः स्वगुरुभ्यः प्राप्तविद्योपदेशः

अनेन विशेषणेन गुरोः सांप्रदायिकत्वमपि शिष्येणान्वेषणीयमिति सूचयति । इह भोगा ऐहिकाः अमुत्र
पारलौकिकास्तेष्वनासक्तस्तत्साधनलोकाराधनतपोयज्ञादिप्रवृत्तिशून्य इत्यर्थः । एतस्य कानि सर्वकर्म
णां साधनानि धनदारसंग्रहशिखायज्ञोपवीतादीनि येन स तथा अतो भोगानासक्त इति विदितः ब्रह्मवित् म इसपी
हावाक्यार्थप्रत्यगात्मतत्त्वज्ञानवानित्यर्थः । तर्किं परोक्षतयैव नेत्याह ब्रह्मणि स्थित इति ब्रह्मणि स्थितिर्न
मनित्यापरोक्षबुद्ध्यैवाहमस्मीति स्फुरदनुभवेनावस्थानं एवंविधोऽपि न यथेष्टचेष्टावानित्याह अभिन्नवृत्त इ
ति न भिन्नो नोल्लंघितं वृत्तमाचारो येन स तथा शिष्टविगर्हिताननुभवतीत्यर्थः । दंभो धर्मध्वजित्वमात्मनो लोके
धार्मिकत्वख्यापनमिति यावत् कुहकं परप्रतारणशास्त्रं नैष्ठुर्यं मायापरस्यामोहनं मात्सर्यं गुणेषु दोषख्या
पनं अनृतं मिथ्याभाषणं अहंकारो देहाभिमानः ममत्वं पुत्रशिष्यादिष्वात्माभिमानः एतैर्दंभादिभिर्दोषैर्व
र्जित इत्यर्थः । एवंविधस्य किमित्यन्योपदेशप्रवृत्तिरित्यत आह केवलेति परस्य संसारसागरान्निर्विण्णस्य
यः परमपदप्रापणेच्छानुग्रहः तदेव प्रयोजनं यस्य स तथा केवलविशेषणेनानुषंगिकमपि प्रयोजनांतरं
प्रवृत्तिहेतुं वारयति तर्हि किं निर्निमित्तमेव परानुग्रहेस्यप्रवृत्तिरन्यत्रप्रवृत्तिवधाह छिकीनेत्याह विद्योपयोगा
र्थीति उपयोगो विनियोगः चात्रालेख्य विषाणं प्राप्स्यतीतिवत् त्यज धर्ममधर्मं च उभे सत्यानृते त्यज उभे

उ.सा० सत्यानृतेत्यक्त्वायेनत्यजसितत्त्यजेत्यत्रयेनज्ञानेनधर्मादिप्रवृत्तिनिरोधेनतानिपरित्यक्तानितत् ज्ञानंपरित्यजेत्क
७ क्तेज्ञानस्यामूर्तत्वात्स्वरूपेणत्यागोयोगादिशिष्टशिष्यप्रतिपादनप्रतिपत्तिकर्मक्रियतेतत्त्ववस्तुमहिम्नापरानुग्रह
तांप्रतिपद्यतइतिभावः ५ एवंविधआचार्यःपूर्वमुपदिशेदित्युपदेशक्रमंदर्शयति प्रथमंकिमुपदिशेदित्य

सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयं यत्रनान्यत्पश्यति आत्मैवेदंसर्वंब्रह्मैवेदंसर्वंआत्मावाइदमेक
एवाग्रआसीत् सर्वंखल्विदंब्रह्मेत्याद्याआत्मैक्यप्रतिपादनपराःश्रुतीरुपदिश्यत्वाद्वयेनब्रह्मणालक्ष्
णेयआत्मापहतपाप्मायत्साक्षादपरोक्षाद्ब्रह्मयोऽशनायापिपासेनेतिनेतिअस्थूलमनणु [illegible]न
ति अदृष्टंद्रष्टृविज्ञानमानंदसत्यंज्ञानमनंतमद्वयेनात्म्यसवाएषमहानजआत्माअप्राणोह्यमनाःसबा
ह्याभ्यंतरोह्यजोविज्ञानघनएवानंतरमबाह्यमन्यदेवतद्विदितादथोविदितात् ६

येऽस्यात्मैकत्वप्रतिपादकवाक्यान्युपदिशेदितिवाक्यानिपठति सदेवेत्यादिना इत्यात्मैकत्वप्रतिपादनपराःश्रु ७
तीःपूर्वमुपदिशेदितिसंबंधः यत्रनान्यत्पश्यतीत्यत्रनान्यच्छृणोतिनान्यद्विजानातिसभूमेतिवाक्यशेषः ब्रह्मैवेदं
[illegible] वरिष्ठमितिशेषः अत्रसद्भूमात्मब्रह्मशब्दाःपर्यायाःअनेकशाखागतवाक्योदाहरणंगतिसामान्या
दितिन्यायेनाविरोधतःस्वार्थपरत्वस्थापनार्थं किंतद्ब्रह्मादिशब्दैर्वस्तूच्यतेकथंचसद्द्वितीयमेवगम्यतइत्यपे

प्रव्रजंति तानिवाएतान्यवराणि तपांसि न्यासएवात्यरेचयदित्यादिशास्त्रप्रसिद्धस्य प्रतिपन्नेति परम
ति हंसविशेषणं कुटीचकादिस्मार्तसंन्यासिव्यावृत्त्यर्थं नहि तेषां तत्त्वादिनामहंतात्मनतोपदेशग्रहणा
धिकार इति भावः एतावता मुमुक्षुपदं व्याख्यातं अन्याप्याभ्रमयमेमान्यनिष्ठस्याधिकारोनास्ती
तिविवक्षन्पुनर्विशिनष्टि शमदमदयादिप्रयुक्तायेति शमोन्तःकरणस्यानात्मविषयेभ्यो व्यावृत्तिः

ॐ अथमोक्षसाधनोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्धानानामर्थिनामथायतदि
दं मोक्षसाधनं ज्ञानं साधनसाध्यं दृष्टिनित्यात्सर्वस्माद्विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिप
न्नपरमहंसपरिव्राज्याय शमदमदयादियुक्ताय शास्त्रप्रसिद्धशिष्यगुणसंपन्नाय शुचये
5 ब्राह्मणाय विधिवदुपसन्नाय शिष्याय जातिकर्मवृत्तविद्याभिजनैः परीक्षिताय ब्रूयात् पु
नः पुनर्यावद्ग्रहणं दृढीभवति १

दमो बाह्येंद्रियाणां रूपादिभ्यो व्यावृत्तिः आदिपदेनोपरतितितिक्षासमाधानश्रद्धाः संगृह्यंते एतेन श्रद्धाना
नामित्येतत् व्याख्यातं अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः असत्वरोर्थजिज्ञासुरनसूयुरमोघवा

उ.सा. क्त इत्यादिवचनमनुसृत्य पुनर्विरक्तिनष्ठ शास्त्रप्रसिद्धेति एतेनार्थिनामितिव्याख्यातं तन्मुमुक्षुर्विर्ब्रह्मकी
३ र्त्तयेत् त्रिसंध्यादौ स्नानमाचरेदित्यादिशास्त्रमाश्रित्याह शुचय इति सबाह्याभ्यंतरशौचसंपन्ना
टीक य इत्यर्थः ब्राह्मणो निर्वेदमायात् एतद्ध स्म वै पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयंते एतं वै
तमात्मानं विदित्वा ब्राह्मणा इत्यादिशास्त्राण्यनुसृत्याह ब्राह्मणायेति विविदिषयापि संन्यासाद्यो न पार
महंसैः संन्यासधर्मेधिक्रियंत इति भावः अत एवोत्पन्नज्ञाना अपि जनकादयो न गार्हस्थ्यं परित्य
क्तवंत इति श्रूयते इदं च शास्त्रं यथोक्तसंन्यासाधिकारिकमेव नाश्रमांतराधिकारिकं आश्रमां
तरस्य प्रवृत्तिधर्मपरत्वेन तदस्यागेन इदं तु निवृत्तिनिष्ठापरत्वायोगात्तस्यागे चाश्रमांतरत्वानुपपत्तेः
वक्ष्यति च भगवान् भाष्यकारः अहं ब्रह्मास्मि कर्त्ता च भोक्ता चास्मीति ये विदुः ते नष्टा ज्ञानकर्मभ्यां ना
स्तिकास्युर्न संशय इति संन्यासिभ्यः प्रवक्तव्यः शांतेभ्यः शिष्टबुद्धिनेति च अतः परिव्राज्यविशेष
णं नित्याधिकारित्वख्यापनार्थं नाश्रमांतरमारुरुक्ष्वर्थमिति केचित् विद्याख्यानं चित्यं तद्विज्ञानार्थं ३
स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतिमाश्रित्याह विधिवदुपसन्नायेति विद्या

अमृते भर्तरि कुण्डः मृते भर्तरि गोलकः

ग्रहणार्थं गुरुस्पादग्रहणपूर्वकमधीहि भगव इत्यादिमंत्रोच्चारणेनाभिवंदनमुपसत्तिस्तां कृतवतस्त्य
र्थः शिष्याय शासनार्हो यपूर्वं श्रुतत्वादिनिमित्तो इत्याहितायविनययुक्तायेत्यर्थः किंगोत्रो नु सोम्या
सीतान् हस्सब्ध्रवियुस्त्वात् भूय एव तपसा श्रद्धया ब्रह्मचर्येण संवत्सरं संवत्स्यथ न संवत्सरवासि
ने प्रब्रूयादिति श्रौतलिंगमवष्टभ्याह जातिकर्मेत्यादिना जातिपरीक्षणं कुण्डगोलकक्षत्रियादिभा
वस्यार्थं कर्मपरीक्षणं पतितत्वाभिशस्तत्वादिराहित्येन शिष्टत्वज्ञानाय वृत्तमाचार शीलं वा तत्परी
क्षणं विद्याग्रहणान्तरकालमपि तत्परिपालनयोग्यतत्त्वज्ञानार्थं विद्यापूर्वाधीतवेदशास्त्रादिरूपो
पि पास्यदेवतादिविशेषविषयावासापरीक्षणीया उक्तार्थग्रहणधारणादियोग्यत्वनिश्चयाय तथा योग्यतां
6 च श्रुतिः नाप्रशान्ताय दातव्यं नापुत्राया शिष्याय वा पुनरिति अभिजनः कुलं जन्मस्थानं तदपि
परीक्षणीयं मातापितृभ्यां गुरुभिश्च शिक्षितत्वाशिक्षितत्वज्ञानार्थं यथा मातृवान् पितृवानाचा
र्यवान्ब्रूयादिति श्रौतलिंगात् एवं विशिष्टाय शिष्याय ब्रूयादित्याचार्यं शिक्षयति उपदेशस्य दृष्टा
र्थतामभिप्रेत्याह पुनः पुनरिति अवधिमाह यावद्ग्रहणं दृढं भवतीति शिष्यस्येति शेषः १

ना श्रुतिश्च परीक्ष्यनतु ब्रूत्यविद्यामितियावद्दृढगृहीता हि विद्या तन्नाश्रेयसे संततेश्च भवति विद्यासंततिश्च प्राण्यनुग्रहाय भवति नो चेन्नदीं तिती
र्षोः शास्त्रं च यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इति २

उ. सा. ७ एवमुक्तविशेषणेन शिष्येणगुरूपसत्तिः कार्या गुरुश्चैतमुपदिशेदित्याह इत्यर्थे श्रुतिमुदाहरति श्रु
४ तिश्चेति परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेत्यादिश्रुतिः संग्रहेण संग्रो
मुंडक वाच्येतां न तु नो ब्रह्मविद्यामित्यंते नेयं ग्रंथेनोक्तो र्थो निरूपित इत्यर्थः । शिष्यस्य दृढग्रहणपर्यंतं गुरुणा
पुनः पुनर्विद्योपदेष्टव्येत्यत्र हेतुमाह दृढगृहीता हीति अतिमनश्रेयसे विद्यादिदा पसंसारनिवृत्तिः
संततिः शिष्यप्रशिष्यादिसंचारेण विद्याया अविच्छेदः विद्यासंततेः कोपयोग इत्यत्राह विद्येति यथा
नदीतरणाय तत्र प्रविष्टस्यागाधे निमज्जतो नरस्य पारं प्रापयितुं नौरुपस्याप्यते हि पाणिना तथा
संसारसागरे निमज्जतः प्राणिनः उद्धरणेन तत्पारं विष्णोः परमपदं प्रापयितुं विद्यासंतानसंरक्षण
मित्यर्थः पूर्वोक्तशिष्यगुणसंपन्नायपरीक्षितायविधिवदुपसन्नायैव विद्यादेया न यथा कथंचि
त्साक्षायधनादिलोभादितिगुरोर्नियमार्थं श्रुतिशासनमुदाहरति शास्त्रं चेति नियामकं शास्त्रं चास्ती
त्यर्थः नदेवाद्यद्यपीति तत्र किमाचार्योपगमेन कार्यं स्वयमेव जिज्ञासोन्यायाद्यनुसरणतो विद्योदय
संभवादिति शंकायामाह नान्यथेति यदा किमित्येवं संकरमवष्टभ्याचार्येण विद्या देया शिष्यः स्वयमेव

इमां पृथ्वीमद्भिः परिगृहीतां ... तदेवास्मै दद्यात्
... ततो विंनपूर्ण पृथ्वीदानादपि ... तमोति ...
... तथा ... साने ...

नो किमसंपाद्येदित्यत आहान्यथा चेति तत्र श्रुतिस्मृतिप्रमाणयस्याचार्यवानित्यादिना आचार्या
द्धैव विद्या विदिता साधिष्ठं प्रापयतीति वाक्यशेषः आदिपदात् तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया
उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इत्यादिवचनं गृह्यते तथा चातिसूक्ष्मपरमार्थनिर्णयस्य

श्रुतिस्मृत्यन्यथा च ज्ञानप्राप्त्यभावादाचार्यवान् पुरुषो वेदाचार्याद्धैव विद्याचार्यः प्लाविता
सम्यक् ज्ञानं प्लव इहोच्यत इत्यादिश्रुतिभ्यः २

स्वबुद्धिसामर्थ्यमात्रेण संपादयितुमश
क्यत्वमेतैर्वाक्यैर्गम्यत इत्यर्थः ३ ननु जिज्ञासोरुक्तविशेषणस्य शिष्यस्य सकृदुपदेशग्रहणाद
वविद्यादार्ढ्योपपत्तेः किमिति पुनः पुनरुपदेशः कार्य इत्युक्तमत आह शिष्यस्येति ज्ञानग्रहणचका शिष्य
रादिपर्यग्रहणं च मुखादिचेष्टावचनवृत्त्यादिलिंगैर्बुद्ध्याऽग्रहणादिहेतुं तत्स्वप्रतिपक्षैस्तान्निवर्तकैः
श्रुतिस्मृतिविहितैरपनयेदिति संबंधः तानेवाहाधर्मेत्यादिना अधर्मः संचितः लौकिकरहानीत

उ.सा. नः प्रमादः कामचारवादभक्षणादिस्तत्र सूर्यादिदेवतोपासनादिनियमोपदेशेनाधर्मक्षपणकारणी
५ भूतं वर्ज्यावर्ज्यादिप्रतिपत्तिधर्मशास्त्रेण प्रमादनिरासः नित्यानित्यविवेकस्य यो विषयस्तेनाचेतनस्तत्प
त्वास्मिन्नसंजाततत्स्पर्शतेनप्रसक्तं यदृष्टं पूर्वं श्रुतत्वं तद्युक्तिविशेषाद्युपन्यासेनापनीयविवेकपर्यन्त
तां नयेदित्यर्थः लोकचिन्तावेक्षणं लोकानां व्यवहारस्य साधुत्वासाधुत्वविचारलक्षणं लोकेभ्यः प्र
शिष्यस्य ज्ञानाग्रहणं च लिंगैर्बुध्या ग्रहणे हेतून् अधर्मं लौकिकप्रमादं नित्यानित्यव
स्तुविवेकविषयासंजाततद्दृष्टपूर्वं श्रुतत्वं लोकचिन्तावेक्षणजात्याद्यभिमानादींस्तत्प्रति
पक्षैः श्रुतिस्मृतिविहितैरपनयेत् क्रोधादिभिश्चापमेतज्ञानाविरुद्धैश्च नियमैरमानित्वा
दिगुणं च ज्ञानोपायं सम्यग्ग्राहयेत् ६ रहिंसादिभि
जात्यभिमानाद्यपेक्षयालसंसर्गोपरोधेन व्यवहरणं वा एतच्च वक्ष्यमाणामानित्वमदंभित्वमित्यादि
शास्त्रोक्तविद्योपदेशेनापनेतव्यं जात्यादीत्यादिपदात्कुलविद्यादिग्रहणं तत्प्रदायपरिशोधनोप ५
देशेन जात्याद्यभिमानं त्याजयेदित्यर्थः अभिमानादीनित्यादिपरेन तत्प्रसक्तो व्यवहारोन्याधिक्षे

वे
एवं विवेकवतस्तव वर्णाश्रमाद्यभिमानो भ्रांतिमूलत्वे स्यात् कथं मृषावादीति कथं भ्रांतिर्मम तिष्ठत्वेवं न
त मा चार्यो ब्रूयात् इत्याह मितितिकिं ब्रूयात् इत्यत आह यतस्त्वमित्यादिना जातिर्जन्म अन्वयः पित्रादिः संस्कारो जात
कर्मादिरुपनयनादिश्च भिन्ना अन्यभूता जात्यन्वयसंस्कारा यस्य शरीरस्य तत्तथा जात्यन्वयसंस्कार

कथं मृषावादी ब्राह्मणपुत्रोऽहं अन्वयो ब्रह्मचार्यासं गृहस्थो वेदानीमस्मि परमहंस परिव्राडिति सत्य
दिव्ययाद्भगवन् कथमहं मृषावादित्वमिति तं प्रतिब्रूयादाचार्यो यतस्त्वं भिन्नजात्यन्वयसंस्कारं
8 शरीरं जात्यन्वयसंस्कारैर्वर्जितस्यात्मनः प्रत्यभिज्ञासी ब्राह्मणपुत्रोऽहं अन्वयइत्यादिना वाक्येनेति

वर्जितस्यात्मनः कूटस्थस्य स्वरूपमेवाहमित्यनुभवन् शरीरं प्रतिज्ञातवान् ब्राह्मणपुत्र इत्यादिना वा
क्येन अतो विपर्ययदर्शित्वान्मृषावादीत्यर्थः उक्तमर्थं विशदीकर्तुं शिष्यप्रश्नमुत्थापयति

सयदीति गुरोरुत्तरदानायप्रवृत्तिमाहाचार्य इति वा[illegible]क्यस्यार्थस्यातिसूक्ष्मत्वाद्दुर्गम्यत्वात्तथानो भवेत्साह
शृणु सोम्येति यथेदमित्यादिवर्जित इत्यंतं शिष्योक्तमनुवादं वाक्यमुक्त्वा तं शिष्यं पूर्वोक्तं परमात्मलक्षणं स्मार
येदितियोजना यस्मात्सदेवेत्यादिश्रुतिभिस्तदर्थानुकूलाभिः स्मृतिभिश्च यथोक्तलक्षणं परमात्मानं स

सयदि पृष्टे त्वं कथं भिन्नजात्यन्वयसंस्कारं शरीरं कथं जात्यन्वयसंस्कारवर्जितः इत्याचार्यो ब्रूयात्
शृणु सोम्य यथेदं शरीरं त्वत्तो भिन्नं भिन्नजात्यन्वयसंस्कारं त्वं च जात्यन्वयसंस्कारवर्जितः इत्यु
क्तानं स्मारयेत्स्मर्तुमर्हसि सोम्य परमात्मानं सर्वात्मानं यथोक्तलक्षणं श्रावितोऽसि सदेव सोम्ये
दमित्यादिभिः श्रुतिभिः स्मृतिभिश्च लक्षणं च तस्य श्रुतिभिः स्मृतिभिश्च १०

र्वात्मानं श्रावितोऽसि तस्मात्स्मर्तुमर्हसि सोम्येति योजनीयो ग्रंथः य आत्मापहतपाप्मेत्यादिभिः श्रुतिभिर्न जायते इत्या ११
दिस्मृतिभिश्च पूर्वोक्तं वृत्तोपलक्षणाच्च तस्मात् अतः स्मर्तुमर्हसीत्यन्वयः ११

एवमुक्तं स्वरूपं स्मारयित्वा शरीरस्य भिन्नजात्यन्वयसंस्कारत्वज्ञापनाय तदुत्पत्तिप्रकारमुपदिशो दिसाद्
लभ्यपरमात्मेति लब्धापरमात्म लक्षणविषयास्मृतिरनुसंधानं येन तस्मै शिष्याय ब्रूयादित्यर्थः उपल
क्षणत्वेनोक्तवाक्यार्थमेव प्रकटयन्नात्मनः सकाशात्संघातोत्पत्तिप्रकारमाह सोसाविस्यादिना यः शाखांतरे
प्रकरणांतरे चात्मादिशब्दैः प्रसिद्धो सावाकाशो येनामरूपयोर्निर्वहिता ते यदंतरे स्यस्थांदोग्ये निर्दिष्ट आका नाम

लब्धपरमात्मलक्षणस्मृतये ब्रूयाद्योसावाकाशनामा नामरूपाभ्यामर्थांतरभूतो

9 शनामा स्यात्मविलक्षणयोर्नामरूपयोर्व्याकर्ता स सर्वस्या त्मेत्यन्वयः आकाशनामे स्युक्ते भूताका
शशंका स्यात्तामाकाशोर्थांतरत्वादिल्यपदेशादिति न्यायेन परिहरति नामरूपाभ्यामर्थांतरभूत इति भूताका
शस्य नामरूपांतःपातित्वात्तयोराधारभूत आत्मा आधेयाराकाशादेरन्य इत्यर्थः असंगत्वादिभिराकाश
साम्यात्परमात्माप्याकाशशब्देन श्रुतिप्रकृचिन्निर्दिश्यते गोण्या वृत्त्येति दुष्टव्यं अत एवाशरीरो मूर्त्तिवर्जितः

उ॰सा॰ अशरीरपदमनिंद्रियत्वादेरप्युपलक्षणमित्यभिप्रेत्य विशिनष्टि अस्थूलादिलक्षण इति अथवा शरीरः शरी
१२ म रादिसंघात रहित इत्यत्र प्रमाणं स्वयं अस्थूलादिलक्षण इति यतः शरीरेंद्रियमनः प्राणादिरहितोऽत एव

[3] शरीरोऽस्थूलादिलक्षणोऽपहतपाप्मादिलक्षणश्च सर्वैः संसारधर्मैरनागंधितः ॥

अपहतपाप्मादिलक्षणोऽभिमन्यमानस्याभावेऽभिमानाभावादित्यर्थः चंदनस्पर्शो विकाररहितं संसमुच्चीयते सर्वै
विशेषणैः सिद्धमर्थमाह सर्वैरिति अनागंधितः असंश्लिष्ट इत्यर्थः ॥

एवपरमात्मनः शरीरादिविलक्षणत्वेपि जीवः शरीरादिलक्षणएवस्यादित्याशंक्यानस्थूलेनानन्यत्वमव
गम्यैवमित्यभिप्रायाद् यत्साक्षादित्यादिना विज्ञाते स्फुरत्प्रमेयं विज्ञानकर्तृत्वं वारयति नित्यविज्ञानस्वरू
पइतितत्रप्रमाणमाहानंतरइत्यादिना आकाशवत्सर्वतःपूर्णइत्यन्वयः पूर्णइति निष्ठाप्रत्ययेन कर्माणि किं
तुकर्त्तरिपरिच्छेदाभावद्योतीसाकाशदृष्टांतः कथमेवंलक्षणस्य दृश्यस्थूलादिकमित्यत आह अनंतशक्तिरिति

यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरः दृष्टो द्रष्टा श्रुतः श्रोता मतो मंता विज्ञातो विज्ञाता नित्यवि
ज्ञानस्वरूपः अनंतरोबाह्यो विज्ञानघन एव परिपूर्ण आकाशवदनंतशक्तिरात्मा सर्वस्याशना
यादि॰र्जित आविर्भावतिरोभाववर्जितश्च

10

इंद्रो मायाभिः पुरुरूप ईयते इतिश्रुतेः आनंता अनवच्छिन्नाद्दुर्लक्ष्या मायावस्थारूपाशक्तयउपाधयोयस्य
सोनंतशक्तिर्मायाकार्यांतःकरणेंद्रियोपाधिभिर्द्रष्टृत्वादिव्यपदेशभाग्भवतीत्यर्थः सर्वस्य स्थावरजंगम
रूपस्य प्रपंचस्यात्मा स्वरूपमित्यर्थः तस्य नित्यमसंसारित्वं स्वाभाविकमशनायादीति आविर्भावति
रोभावस्साक्षित्वादेवनद्धि वर्जित इत्यर्थः एवमात्मस्वभावमुक्त्वानामरूपात्मकानात्मस्वभावं प्रपंचयति स्वात्मवि

उपादानत्वव्यपदेशस्याभिप्रायः

उ·सा· लक्षणयोरित्यादिना अचेतनयोरित्यर्थः जगद्बीजभूतयोरित्युपादानत्वमुच्यते कथं तर्ह्यात्मोपादानत्वं श्रुतिरित्य
१२ त आह स्वात्मस्थयोरिति उपादानाधारमात्रेणैव कथमुपादानत्वसिद्धिरित्यत आह सद्भावमात्रेणेति सद्भावो नाम सत्त्वं
आत्मसत्तामात्रेणैवात्मनिस्थितयोर्नपृथक्सतोरात्मनिष्ठयोरित्यर्थः तथा च स्वात्मैकतां गतयोर्नामरूपयोर्

स्वात्मविलक्षणयोर्नामरूपयोर्जगद्बीजभूतयोः स्वात्मस्थयोस्तत्त्वान्यत्वाभ्यामनिर्वचनी
ययोः सद्भावमात्रेणाचिंत्यशक्तित्वादात्मा कर्ता व्याकृतयोः १२ न
स्वसंवेद्ययोः

कर्त्ता स्वात्मन एव व्याकर्तेत्युपादानसिद्धिरात्मन इत्यभिप्रायः कुत एवं चिद्रूपस्य आत्मनः चिद्रूपेण स्वात्मव्याक १३
रणमित्यत आह अचिंत्यशक्तित्वादिति अव्याकृतयोरनभिव्यक्तयोरित्यर्थः अनभिव्यक्ततया स्थितं हि व्यक्तीक्रिय
ते व्यक्तस्यागमस दतिप्रसंगादिति भावः १२

...लक्षणयोर्नामरूपयोर्यद्रसौ नेत्याह यितानदा किमात्मके ते प्रपंचे नेत्याशंकेति तदाह तेनामरूपे इत्यादिना तस्माद्
परं तत्परमात्मा दिलक्षणादेतस्मादचिंत्यशक्तेः सर्वज्ञादाकाश इति नामवाचकः शब्द आकृतिर्वा आकारः स्वेयमाकारे संवृत्ते
एवं स्ववस्त्वारणयोरुपभूतामित्यर्थः वाच्यवाचकाकारेणासदात्मकं बुद्धेयं मायावशादभिव्यक्तमाकाशादिशब्दार्थात्मकाभि
तितात्पर्यार्थः ननु कथं चिदात्मनोऽचिदात्मकाकाशात्मनानिष्पत्तिरिति शंकां दृष्टान्तेन परिहरति तेनाकाशाख्यमित्यादि

तेनामरूपे अव्याकृते व्याक्रियमाणे तस्मादेतस्मादात्मनः आकाशनामाकृतिः संवृत्ते तेनास्याकाशाख्यं भूतम्
नेन प्रकारेण परमात्मनः संभूतं प्रसन्नाद्विमलसलिलान्मलमिव फेनं न सलिलं न च सलिलादत्यन्तभिन्नं
फेनस्य सलिलव्यतिरेकेणादर्शनात् सलिलं तु स्वच्छमन्यत् फेनात्मलरूपादेवं परमात्मा नामरूपाभ्याम्
न्यः फेनस्थानीयाभ्यां शुद्धः प्रसन्नस्तद्विलक्षणस्ते नामरूपे अव्याकृते सती व्याक्रियमाणे फेनस्थानीये
आकाशनामाकृती संवृत्ते १३

ना दृष्टान्तं विवृण्वन्नात्मनः परिणामित्वशंकां वारयति न सलिलमित्यादिना सलिलव्यतिरेकेण स्वरूपतः पृथगनुप
लम्भादित्यर्थः फेनस्य सलिलाद्भेदाभावे सलिलस्यापि न ततो भेद इत्यत आह सलिलं त्विति अतो न सलिलमेव फेनं ना
पि ततो भिन्नं किंत्वनिर्वचनीयमित्यर्थः तथा च श्रुतिर्वाचारंभणं विकारो नामधेयमिति दार्ष्टान्तिकमाह एवं परमा
त्मेति निरूपितामाकाशोत्पत्तिं निगमयति तेनामरूपे इति १३

उ.सा. इदानीं ततो वाय्वाद्युत्पत्तिं प्रतिपादयति ततोपीत्यादिना आकाशात्मना स्थितेन नामरूपेण तद्गुणगतेनात्मना आक्रियमाणे
१५ ततो प्याकाशादपि स्थूलभावमापद्यमाने सती वायुभावमापद्यते इति योजना स्थूलभावः स्पर्शगुणेनोपचयः येन नामरूपे
आकाशात्मतां प्राप्ते ते एवमाक्रियमाणे वायुभावमापद्येते इति कर्तव्यं विकारस्य विकारान्तरोपादानत्वं वायुरिति एवमुत्तर
[illegible]ष्वपि द्रष्टव्यं तदेवं भूतोत्पत्तिमुक्त्वा तेभ्यः संघातस्य स्थूलस्योत्पत्तिप्रकारमाह पृथिव्यामिति पंचात्मको इति

ततोपि स्थूलभावमापद्यमानेन नामरूपेणाक्रियमाणे वायुभावमापद्यते ततो ग्निभावमग्नेर पं
भावं ततः पृथ्वीभावमित्येवं क्रमेण पूर्वपूर्वानुगतानुप्रवेशेन पंच महाभूतानि पृथिव्यान्युत्पन्ना
नानि ततः पंच महाभूतगुणविशिष्टाः पृथिव्याश्च पंचात्मकाद्व्रीहियवाद्या ओषधयो जायं
ते ताभ्यो भक्षिताभ्यो लोहितं शुक्लं च स्त्रीपुंसशरीरसंबंधि जायते तदुभयमृतुकाले विधाय पु
ंस्कामः स्वजनिषेकयोनावृते मंत्रसंस्कृते गर्भाशये निषिच्यते तत्स्वयोनिरसानुप्रवेशेन
विवर्धमानं गर्भीभूतं नवमे दशमे वा मासि संजायते १५ १५

पंचीकृतपंचभूतनिर्वर्तिता इत्यर्थः तदुभयं स्त्रियाः लोहितं पुंसः शुक्लं चेत्यर्थः काम एव स्वजो विसर्ग कामं यातेन
[illegible]घनादृतमित्यर्थः गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वतीत्यादि गर्भाधानमंत्रैः संस्कृतमित्यर्थः १५

एवं शरीरोत्पत्तिमुपोद्घातत्वेनोपदिश्य तस्य भिन्नजात्यन्वयसंस्कारं एहं प्रतिपादयति तज्जातमित्यादिना । जातमि
त्यस्य व्याख्या स्पष्टनामाह तिकमिति भूतोपादानत्वेन पित्रादिनिमित्तकत्वेन च भिन्नजात्यन्वयो शरीरस्योक्तो

तज्जातं स्पष्टनामाह तिकं जातकर्मादिभिर्मन्त्रैः संस्कृतं पुनरुपनयनसंस्कारयोगेन ब्र
ह्मचारिसंज्ञं भवति तदेव च शरीरं पत्नीयोगसंस्कारयोगेन गृहस्थसंज्ञं भवति तदेव वनसं
स्कारेण तापससंज्ञं भवति तदेव क्रियाविनिवृत्तिनिमित्तसंस्कारेण परिव्राट् संभवत्येवं त

12

इदानीं संस्कारमाह जातकर्मादिभिरिति एवं स्थूलशरीराभिमानाद्विण्यं व्युत्थाप्य सूक्ष्मशरीराभिमानमपि तस्य
त्याजयंस्तस्यापि भौतिकत्वमाह मनश्चेत्यादिना नामरूपात्मकत्वेन भौतिकान्येवेत्यर्थः तत्र प्रमाणमाह।

उ·सा· न्नमयमिति अतो मनआदिसूक्ष्मसंघातोऽपि नात्माभेति कृत्वा स्थूलत्वादित्यर्थः कथं भिन्नजात्यन्वयसंस्कारं श
१५ रीरमित्यस्य प्र[illegible] न्नस्योत्तरमभिधाय कथं वाहं जात्यन्वयसंस्कारवर्जित इति शिष्योक्तिमनूद्योत्तरमाह कथं

न्तो भिन्नं भिन्नजात्यन्वयसंस्कारं शरीरं मनश्चेन्द्रियाणि च नामरूपात्मकान्येवान्नमयं हि सोम्य मन इत्यादिश्रुतिभ्यः कथं वाहं भिन्नजात्यन्वयसंस्कारवर्जित इत्येतत्कृणु योऽसौ नामरूपयोर्व्याकर्ता नामरूपधर्मविलक्षणः स एव नामरूपे व्याकुर्वन् सृष्ट्वेदं शरीरं स्वयं संस्कारधर्मवर्जितो नामरूपे इह प्रविष्टः १५

चेत्यादिना यस्तु नामरूपविलक्षणः पूर्वोक्तविशेषणो नामरूपात्मकस्य सर्वस्य स्रष्टा जात्यन्वयसंस्कारवर्जितः स एवाविकृतः सृष्टेषु कार्यकारणसंघातेषु प्रविष्टो जीवात्मेति श्रुतिस्मृतिप्रसिद्धत्वान्न तस्य जात्यन्वयसंस्कारसंबंध इति प्रतिपादयन्नाह योऽसावित्यादिना १५ १५

ननु परमात्मैव चेद्देहे प्रविष्टः पश्यन्नीरं तर्हि कथं सर्वैर्नोपलभ्यत इति तत्राह अन्यैरदृष्ट इति अदृष्टो द्र
ष्टेत्यादिश्रुतिरिहार्थतो दर्शिता सर्वस्य प्रयोक्तृत्वात्तस्य सर्वावभासकत्वान्नान्यैरवभास्यते सोऽस्यैव देहे प्रविष्ट इति भावः
अत्र मंत्रमुदाहरति सर्वाणीति रूपाणि शरीराणि विचित्य विरच्य यो धीरो धीमान् सर्वज्ञस्तत्र प्रविश्य नामानि

अन्यैरदृष्टः स्वयं पश्यंस्तथाश्रुतः शृण्वन्नमतो मन्वानो विजानन् सर्वाणि रूपाणि विचित्य
धीरो नामानि कृत्वाभिवदन्यदास्ते इत्यस्मिन्नर्थे श्रुतयः सहस्रशः तत्सृष्ट्वा तदेवानुप्रावि
13 शदित्यः प्रविष्टः शास्ता जनानां सर्वात्मा एष त इह प्रविष्टः एष त आत्मा स एतमेव सीमानं विदार्यैत

कृत्वा देवोऽहं मनुष्योऽस्मि ... अस्म्यभिवदन्नामादिव्यापारं कुर्वन्यदास्ते यो वर्तते तेनं वेदाहमेतमिति पूर्वार्द्धेनान्वयः अ
स्मिन्नर्थे इति सृष्ट्वेव जीवरूपेण प्रवेश इत्यत्रेत्यर्थः ब्राह्मणवाक्यान्यत्रोदाहरति तत्सृष्ट्वेत्यादिना एष त आ
त्मान्तर्याम्यमृत इति वाक्यशेषः स ईक्षणपूर्वकं जगत्सृष्ट्वा एतमेव प्रसिद्धं सीमानं शिरःकपालसंधिं विदार्य

उ.सा. भित्त्वा एतया द्वारं प्रवाश्य मार्द्धारान्ध्रेण प्रापद्यत देहमध्ये प्रविष्ट इत्यर्थः अंतःप्रविष्टं कर्तारमेतमन्तर्भूतोसन्नुप्रिय
२६ माणो बिभर्ति। एको देवो बहुधा निविष्टः इंद्रं मि वरुणमग्निमाहुरथो दिव्यः ससुपर्णो गरुत्मान् एकं सद्विप्रा ब
हुधा वदंत्य निर्यमं मातरिश्वानमाहुरित्यादिमन्त्रब्राह्मणवादानन्यत्वसूचयन्तीत्याद्याः श्रुतय इति परमात्मैव क्षेत्रज्ञ इति

याद्वारा प्रापद्यतैष सर्वेषु भूतेषु गूढात्मा सेयं देवतेक्षत हंता[illegible]हमिमास्तिस्रो देवता इत्याद्याः श्रु
तयः स्मृतयोपि आत्मैव देवताः सर्वाः नवद्वारे पुरे देही क्षेत्रज्ञं चापि मां विद्धि समं सर्वेषु भूतेषु उप वि
द्रष्टानुमन्ता च उत्तमः पुरुषस्त्वन्यः शरीरं शरीरेष्वित्याद्याः स्मृतयस्तस्माज्जात्यन्वयसंस्कारव
र्जितस्त्वमिति सिद्धं १९

श्रुत्युक्तेर्थे स्मृतीरपि उदाहरति स्मृतयोपीति शरीरे वर्त्तमानस्यापि शरीरधर्मासंस्पर्शित्वे श्रुतिं प्रमाणयत्यशरीरं शरी १९
रेष्विति सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमित्यादिश्रुतयः आदिशब्दार्थः यस्मादेवं श्रुतिस्मृतिन्या
येरात्मा देहादेर्भिन्नोऽसंगस्तद्धर्मासंस्पृष्टश्च तस्मादिति प्रकृतमुपसंहरति तस्मादिति १९

एवं परमात्माभेदोपदेशेन जीवस्याज्ञाद्यन्वयसंस्कारराहित्यमुक्तं मंधार्यतन्त्रस्वानुभवविरोधं शंकते सयदीति अन्यत्वादेः स्वा
त्मन्यनुभवसिद्धत्वात्तद्विलक्षणेश्वरात्मत्वं श्रुत्यादिभिरुक्तमपि न संभावयामि किंतु भिन्नमेवतमहमन्येयुत्कृष्टमीश्वरं नि
त्यं संराधयेत्मना पश्यन् प्रत्यवायापत्तेः ततस्तैरेवं स्वकर्मणा भक्त्या चाराध्य तस्मात्संसारान्मुक्तः संसारो भविष्यामीति मम मतिरिति
शिष्याभिप्राय इत्यर्थः नैवंवादी भेददर्शन एव प्रत्यवायश्रवणादिति गुरुः परिहरति नैवं सोऽस्मीति संग्रहवाक्यमाह

सयदि ब्रूयादन्य एवाहमज्ञः सुखी दुःखी बद्धः संसार्यन्योऽसौ मद्विलक्षणोऽसंसारी देवस्तमहं बल्युपहार
नमस्कारादिवर्णाश्रमकर्मभिश्चाराध्य संसारसागरादुत्तितीर्षुरस्मि कथमहं स एवेति स आचार्यो ब्रूयान्नैवं
सोम्य प्रतिपत्तुमर्हसि प्रतिषिद्धत्वाद्भेदप्रतिपत्तेः कथं प्रतिषिद्धा भेदप्रतिपत्तिरित्यत आह अन्योऽसावन्यो
हमस्मीति न स वेद यथा पशुरेवं स देवानां ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्येव
माधाः १२
पसमाधानाभ्यां विवृणोति कथमित्यादिना प्रत्यक्षसिद्धस्य भेदस्य कथं न द्विरुद्धप्रमाणान्तरेण प्रतिषेध इत्याक्षेपार्थः अ
संसारीश्वरस्याप्रत्यक्षत्वान्नेश्वरस्य स्वात्मनि प्रत्यक्षत्वाभावात्सुखित्वाद्यनुभवस्याज्ञस्याप्युपपत्तेः तद्वलाद्धेदाध्यव
सायायोगादनन्यथासिद्धार्थश्रुतिनिषिद्धो भेदो न मानमर्हतीति समाधानाभिप्रायः १२

उ.सा. उदाहृताःश्रुतयोनभेददर्शनमात्रंनिषेधंतिकिंतुभेददर्शिनःप्रत्यवायमप्यनर्थप्राप्तिरूपमावेदयंतिइत्याह एताएवे
२७ ति तथाहि अन्योसौपरमेश्वरोमदृिलक्षणोऽन्योहमहिलक्षणःसंसारीचेतियोन्यांदेवतामुपास्तेतात्पर्येणपश्यति
नसवेदवेतत्त्वमितिभेददर्शनस्याविद्यामूलत्वमुक्त्वायथापशुरेवसदेवानामितिदेवपशुत्वप्राप्तिंतस्यदर्शयंति नहि

एताएवश्रुतयोभेदप्रतिपत्तेःसंसारगमनंदर्शयंत्यभेदप्रतिपत्तेश्चमोक्षंदर्शयंतिसहस्रशः
सआत्मातत्त्वमसीतिपरमात्मभावंविधायाचार्यवान्पुरुषोवेदेत्युक्त्वा तस्यतावदेवचिरमिति

पराधीनस्यात्मवतोन्यैर्दृन्यंकष्टंवावर्त्तनइतितथायोन्यत्रान्यदेवेदमित्यात्मनःपृथगेवब्रह्मब्रह्मणजातिंवेदतं ७५
भाष्य तदेवचब्रह्मणत्वजातिःपराद्दात्पराकुर्यात्तत्त्वविमुखंकुर्यादात्मरूपंमाप्नुतात्मतयापश्यतीतिइत्थेवनतुहितमा
चरतीत्यर्थः एवंस्वतन्त्रंपरात् [illegible] त्वानुदासरूपंदृश्यं इत्यात्मनियोनानाइवपश्य

तिरेवशब्दो नानात्वदर्शनस्याभासप्रद्योतनार्थः समृत्योर्मृत्युं संसारात्संसारमनर्थपरंपरामेवाप्नोतीत्येव
मद्याऽऽत्ति नेह नानास्ति किंचन उदरमन्तरं कुरुते अथ तस्य भयं भवतीत्याद्याः श्रुतयोऽपि संति भेददृष्टिं निंदि
ताऽभेददृष्टिफलवत्तया प्रशंसंतस्याऽखंडार्थं पादयतां दर्शयति अभेदप्रतिपत्तेश्चेति तत्र श्रुत्येकदेशमु

मोक्षं दर्शयति अभेदविज्ञानादेव सत्याभिसंधस्यातस्करस्येव दाहाद्यभाववत्संसा
राभावं दर्शयति तस्करस्येव दाहादिदृष्टान्तेन १९
भेददर्शनादसत्याभिसंधस्य सं
सारगमनं दर्शयति

15

दाहस्य चाचष्टे स आत्मेत्यादिना तत्रैवान्वयव्यतिरेकोपपत्तिपरश्रुत्यर्थमुदाहरन्नुक्तमर्थं द्रढयति अभे
दविज्ञानादेवेति पुरुषं सोम्येति हस्तगृहीतमानयंतीति खंडेऽस्ममर्थं दर्शयतीत्यर्थः १९

उ.सा. सुषुप्तोपरमात्मन्यभेदसंपत्तावपि तथाज्ञानाभावापराधादेव पुनरपि व्याघ्रादिभावेनोत्थितानां संसा
१८ राविच्छेदं दर्शयतीश्रुतिः परमात्माभेदेनात्मज्ञानमेव मोक्षहेतुरिति सूचयतीत्यभिप्रेत्याह व्याघ्रो
वेत्यादिनात्मनः निरस्ते निरत्यये भयं प्रतिष्ठां विंदते अथ सोभयं गतो भवति
चेति अनेनोदाहरणान्तरमाह अभेददर्शनात्संसरा इत्यादिना यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते ना

तरह व्याघ्रो वेत्यादिना चाभेददर्शनात्संसारादुद्धवतीत्युक्त्वान्तरं विपरीतेन भेददर्शनेन
संसारगमनं दर्शयन्स्य घ एन्द्र यातो विदुरन्यराजानस्ते क्षय्यलोका भवंतीति प्रति

यदा ह्येवैष एतस्मिन्नु १८
दरमंतरं कुरुते अथ तस्य भयं भवतीत्याद्याः श्रुतयो प्रमुदाहर्तव्या इत्याह इति प्रतिशाखमिति।

वृ॰ टि॰ एवंश्रुतिस्मृतिभिश्चेति तथाचशिष्यप्रतिपरीक्षणार्थोश्रुतिर्भवतियदिमन्यसेसुवेदेतिदहरमेवापि
नूनंत्वंवेत्थब्रह्मणोरूपमित्याद्यहंसोम्यप्रियदर्शनकः संकिमात्मकइतिगुरुणापृष्टोयदिशिष्याप्रतिप
द्योयप्रतिबंधवशात्ब्रूयाद्ब्राह्मणपुत्रइत्यादिनदाचार्योब्रूयादितिसंबंधः असावन्वयोवंशोयस्यसोहमदान्व
यः अमुकरीत्यस्मिन्वंशोहमित्यर्थः महाशयादानकः तिमिंगिलोथा अहोयमस्यापिदेहाभिमानप्रतिबद्धता

एवंश्रुतिस्मृतिभिर्गृहीतपरमात्मलक्षणंशिष्यंसंसारसागरादुत्तितीर्षुंपृच्छेत् कस्त्वमसिसोम्ये
ति सयदिब्रूयात् ब्राह्मणपुत्रोऽदोन्वयोब्रह्मचार्यासंगृहस्थोवेदानीमस्मिपरमहंसपरिव्राट्
16 संसारसागराज्जन्ममृत्युमहाग्रहात् उत्तितीर्षुरित्याचार्योब्रूयादिहैवतेसोम्यमृतस्यशरीरं
वयोभिरद्यतेमृद्भावंवापद्यतेतत्रकथंसंसारादुत्तर्तुमिच्छसीतिनहिनद्याअवरेकूलेभस्मीभू
तोनद्याःपारंतरिष्यतीतिसयदिब्रूयात् अन्योहंशरीरात् ८

नोद्यइतितस्याजयस्याचार्यःइहैवतेइत्यादिना वयोभिःपक्षिभिर्गृध्रादिभिरित्यर्थः एवंस्थूलदेहाभिमानेत्या
जितेततोविविक्तमात्मानंमन्यमानःसन्नुसयदिशिष्योब्रूयादन्योहंशरीरादित्यादिनदाइत्याचार्योब्रूयादित्यन्तरे
णान्वयः ८

उ.सा.१ कथं शरीरादन्यत्वमवगन्तव्यमत आह शरीरं तु जायत इत्यादिना शरीरावस्था दुःखं तामृत्यादिकारिणोऽहं दुःखी
१० विकार्यन्य इत्यर्थः कथं न हि देहादन्यस्य न तव देहाभिमानपूर्वको व्यवहार इति चेदविद्यासक्तकामप्रवर्त्तितधर्माधर्म
वशादित्याह तस्मिन्नहमिति स्वकृतविशेषणेनाहंकारपूर्वकत्वद्योतनादहंकारस्य चाविद्यां विना कल्पकत्वेनात्मन्य
सम्भवादविद्यापूर्वकाभिमानमूलत्वं धर्माधर्मयोरिति भावः यद्येवं जानासि मा तर्हि कर्मकार्षीरित्यत्र पूर्वपूर्वकृतकर्म
